शश्वद्विन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ।
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च योगिनम् ॥
तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥"
इति श्रीभागवते ९ स्कन्धे ६ अध्यायः ॥

यौवनाश्वकः, पुं, (यौवनाश्व+स्वार्थे कन् ।) मान्धातृराजः । इति जटाधरः ॥

यौष्माकं, त्रि, (युष्मद्+अण् । "तस्मिन्नणि च युष्माकास्माकौ ।" ४ । ३ । २ । इति प्रकृतेर्युष्माकादेशः ।) युष्मत्सम्बन्धि । युष्माकमिदं इत्यर्थे ष्णप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ११२ । २०५ ।
"इत्याद्यस्मासु जल्पत्सु मिलितेष्वत्र तत्क्षणम् ।
विद्याधरो धूमशिखो यौष्माकोऽवातरद्दिवः ॥")

यौष्माकीणं, त्रि, (युष्मद्+"युष्मदस्मदोरन्यतरस्यां खञ्च ।" ४।३।१ । इति खञ् । "तस्मिन्नणि चेति ।" ४ । ३ । २ । इति युष्माकादेशः ।) युष्मत्सम्बन्धि, युष्माकमिदं इत्यर्थे ष्णीन् प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ युष्मच्छब्दे अलिखितत्वादवसरसङ्गत्या गौणयुष्मदस्मच्छब्दप्रयोगोऽत्र लिख्यते । युष्मदस्मदोर्मुख्यत्वे गौणत्वे च सिजस् ङेङसां स्वरूपग्रहणात् तेषु परेषु त्वाहयूयवयतुभ्यमह्यतवममाः स्युरेव । सिजसादेरन्यत्र युष्मदस्मदोर्मुख्यत्वे एकवचने परे त्वन्मदौ द्विवचने परे युवावौ बहुवचने परे स्वरूपेणावस्थानम्, गौणत्वे तु परविभक्तिमनादृत्य युष्मदस्मदोरेकत्वे त्वन्मदौ द्वित्वे युवावौ बहुत्वे स्वरूपेणावस्थानमिति ॥*॥ यथा त्वामतिक्रान्तः अतित्वं अतित्वां अतियूयम् । अतित्वां अतित्वां अतित्वान् । अतित्वया अतित्वाभ्यां अतित्वाभिः । अतितुभ्यं अतित्वाभ्यां अतित्वभ्यम् । अतित्वत् अतित्वाभ्यां अतित्वत् । अतितव अतित्वयोः अतित्वयाम् । अतित्वयि अतित्वयोः अतित्वासु ॥*॥ युवामतिक्रान्तः अतित्वं अतियुवां अतियूयम् । अतियुवां अतियुवां अतियुवान् । अतियुवया अतियुवाभ्यां अतियुवाभिः । अतितुभ्यं अतियुवाभ्यां अतियुवभ्यम् । अतियुवत् अतियुवाभ्यां अतियुवत् । अतितव अतियुवयोः अतियुवयाम् । अतियुवयि अतियुवयोः अतियुवासु ॥*॥ युष्मानतिक्रान्तः अतित्वं अतियुष्मां अतियूयम् । अतियुष्मां अतियुष्मां अतियुष्मान् । अतियुष्मया अतियुष्माभ्यां अतियुष्माभिः । अतितुभ्यं अतियुष्माभ्यां अतियुष्मभ्यम् । अतियुष्मत् अतियुष्माभ्यां अतियुष्मत् । अतितव अतियुष्मयोः अतियुष्मयाम् । अतियुष्मयि अतियुष्मयोः अतियुष्मासु ॥*॥ मामतिक्रान्तः अत्यहं अतिमां अतिवयम् । अतिमां अतिमां अतिमान् । अतिमया अतिमाभ्यां अतिमाभिः । अतिमह्यं अतिमाभ्यां अतिमभ्यम् । अतिमत् अतिमाभ्यां अतिमत् । अतिमम अतिमयोः अतिमयाम् । अतिमयि अतिमयोः अतिमासु ॥*॥ आवामतिक्रान्तः अत्यहं अत्यावां अतिवयम् । अत्यावां अत्यावां अत्यावान् । अत्यावया अत्यावाभ्यां अत्यावाभिः । अतिमह्यं अत्यावाभ्यां अत्यावभ्यम् । अत्यावत् अत्यावाभ्यां अत्यावत् । अतिमम अत्यावयोः अत्यावयाम् । अत्यावयि अत्यावयोः अत्यावासु ॥*॥ अस्मानतिक्रान्तः अत्यहं अत्यस्मां अतिवयम् । अत्यस्मां अत्यस्मां अत्यस्मान् । अत्यस्मया अत्यस्माभ्यां अत्यस्माभिः । अतिमह्यं अत्यस्माभ्यां अत्यस्मभ्यम् । अत्यस्मत् अत्यस्माभ्यां अत्यस्मत् । अतिमम अत्यस्मयोः अत्यस्मयाम् । अत्यस्मयि अत्यस्मयोः अत्यस्मासु । इति दुर्गादासः ॥

---

## र

र, रेफः । यथा । वर्णात् कारतकारौ राद्रेफः । इति कलापसंक्षिप्तसारव्याकरणे । रेफात् कारश्च । रकारः । इति प्रक्रियाकौमुदी ॥ स तु सप्तविंशव्यञ्जनवर्णः । तस्योच्चारणस्थानं मूर्द्धा । इति मुग्धबोधव्याकरणम् ॥*॥ (तथा च शिक्षायाम् । १७ ।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥")
तस्य स्वरूपं यथा,—
"रेफञ्च चञ्चलापाङ्गि ! कुण्डलीद्वयसंयुतम् ।
रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा ।
पञ्चप्राणमयं वर्णं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे ६ पटलः ॥*॥
तस्य लेखनप्रकारो यथा,—
"दक्षतः कुण्डली रेखा वामाद्दक्षगताप्यधः ।
पुनर्दक्षगता द्वेधा ततोऽधोगता चोर्द्धतः ॥
भवानी शङ्करो वह्निस्तासु तिष्ठन्ति नित्यशः ।
अर्द्धमात्रा ब्रह्मरूपा महाशक्तिः प्रकीर्त्तिता ॥"
अपि च ।
"ऊर्द्धाधःक्रमतो रेखा त्रिकोणाधोगता हि सा ।
विधिरीशः केशवश्च तासु तिष्ठन्ति नित्यशः ॥
ऊर्द्धस्थिता तु या मात्रा सा शक्तिः परिकीर्त्तिता ।
तस्य मध्यगता रेखा वह्निरूपा हि सा स्मृता ।
निर्गुणोऽसौ सदा वर्णो न कदाचित् गुणीभवेत् ॥"
अस्य ध्यानं यथा,—
"ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोचनाम् ।
रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम् ॥
रक्तमाल्याम्बरधरां रत्नालङ्कारभूषिताम् ।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
तन्नाममन्त्रो यथा,—
"त्रिशक्तिसहितं देवि ! आत्मादितत्त्वसंयुतम् ।
सर्व्वतेजोमयं वर्णं सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥*॥
तस्य नामानि यथा,—
"रो रक्तः क्रोधिनी रेफः पावकस्तैजसो मतः ।
प्रकाशो दहनो दीप्तो रतिकण्ठापरं बली ॥
भुजङ्गेशो मतिः सूर्य्यो धातुरक्तः प्रकाशकः ।
व्यापको रेवतीदासं कुक्ष्यंशो वह्निमण्डलम् ॥
उग्ररेखा शूलदण्डो वेदकण्ठपला पुरा ।
प्रकृतिः सुगतो ब्रह्मशब्दश्च गायको धनम् ॥
श्रीकण्ठ उष्मा हृदयं मुण्डी त्रिपुरसुन्दरी ।
सबिन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी ॥"
इति नानातन्त्रशास्त्राणि ॥
(छन्दःशास्त्रोक्तगणविशेषः । यथा, छन्दोमञ्जर्य्याम् । १ । ८ । "र-लमध्यः ।" लघुवर्णमध्यो रः भवति । तस्येदं साङ्केतिकं चिह्नम् ऽ।ऽ पद्यादौ अस्याक्षरस्य प्रयोगे दाहो भवति । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"सोऽलग्नौ रस्तु दाहं वसनमथ लघौ शः सुखं यस्तु खेदम् ॥"
धातुसम्बन्धविशेषः । यथा, कविकल्पद्रुमे ।
"————चो जचादि र वैदिकः ।"
"वैदिको वेदेष्वेव प्रयुक्तो न तु भाषायामित्यर्थः । यथा, गार्ति स्तुतौ जगाति ॥")

रः, पुं, (राति जडं गलतीति । रा+डः ।) पावकः । तीक्ष्णः । इति मेदिनी । रे, १ ॥ कामवह्निः । इति शब्दरत्नावली ॥

रंहः, [स्] क्ली, (रमते येन इति । रम्+"रमेश्च ।" उणा० ४ । २१२ । इति असुन् । हुगागमश्च धातोः । "रहिरंहिभ्यामसुन् इति वंहो रंहः । इति धातुप्रदीपः ।" इत्युज्ज्वलदत्तः ।) वेगः । इत्यमरः । १ । १ । ६० ॥ (यथा, रघुवंशे । २ । ३४ ।
"अलं महीपाल ! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥"
महादेवः । यथा, महाभारते । १४ । ८ । १५ ।
"हरिनेत्राय मुण्डाय कृशायोत्तरणाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥"
विष्णुः । यथा, महाभारते हरिवंशपर्व्वणि २५२ । १८ ।
"नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे ।
प्रयाताः प्राग्दिशं पुण्यां विपुलं कश्यपाश्रमम् ॥")

रक, क स्वादे । आप्ने । इति कविकल्पद्रुमः ॥ स्वादो रसोत्पादनम् । क, राकयति मोदकं बालकः । इति दुर्गादासः ॥

रक्तं, क्ली, (रज्यते अङ्गमनेनेति । रञ्ज्+क्तः ।) कुङ्कुमम् । ताम्रम् । (अस्य पर्य्यायो यथा,—
"रक्तं वरिष्ठं म्लेच्छास्यं ताम्रं शुल्बमुदुम्बरम् ।"
इति वैद्यकरत्नमालायाम् ॥)
प्राचीनामलकम् । इति मेदिनी । ते, ४८ ॥ पद्मकम् । (अस्य पर्य्यायो यथा,—